# संस्कृत वार्ता:

दिनाङ्क : 07/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- नेपाल देशे, बालेन्द्रशाहस्य राष्ट्रिय-स्वतन्त्र-पार्टीति दलं सद्य एव संजाते सामान्यनिर्वाचने व्यापकं विजयं प्रति गच्छन् अस्ति।
- अद्य कोटा-बुन्दी ग्रीन्फील्ड् विमानस्थानकस्य शिलान्यासावसरे आभासीय-मध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् कोटा-नगरं परितः स्थितानां क्षेत्राणां कृते प्रगतेः
- केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य उत्तराखण्डस्य हरिद्वार-नगरे प्रायः त्रिंशोत्तरैकशतकोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनम् शिलान्यासं च कृतवान्।
- तैल-विपणन-संस्थाः देशस्य महानगरेषु विना-अनुदानितस्य गृह एल्. पी. जी.-वातीन्धनेत्यस्य मूल्यं षष्ठी रूप्यकाणि, वाणिज्यिक-सिलिण्डर इत्यस्य मूल्यं पञ्चदशोत्तरैकशत रूप्यकाणि यावत् च वर्धितवन्तः।
- चतुरङ्ग-विश्व-विजेता डी. गुकेशः ह्यः चेक्-रिपब्लिक्-देशे प्राग्-अन्ताराष्ट्रिय-चेस्-फ़ेस्टिवल् इत्यस्मिन् मास्टर्स-श्रेण्याः नवमे तथा अन्तिमक्रमे स्पेन्-देशस्य डेविड् आन्टन् गुय्जारो इत्यमुं पराजयत।

---

<u>नेपाल-निर्वाचनम्-</u>

बालेन्द्रशाहस्य राष्ट्रिय-स्वतन्त्र-पार्टीति दलं जेन जी-विरोधस्य अनन्तरं नेपालस्य प्रथमे सामान्यनिर्वाचने व्यापकं विजयं प्रति गच्छन् अस्ति। पञ्चषष्ठ्योत्तरैकशत निर्वाचनक्षेत्रेषु अद्यावधि पञ्च-पञ्चाशत् निर्वाचनासनेषु अन्तिम-परिणामस्य घोषणा कृता अस्ति। अत्रान्तरे शेषेषु आसनेषु मतानां गणना प्रचलति।

---------------------------------------------------------

## पीएम कोटा-बुन्दी

लोकसभाध्यक्षः ओम् बिरला राजस्थनस्य मुख्यमन्त्री भजन लाल शर्मा, नागरिक-विमानन-मन्त्री राम मोहन नायडु च कोटा-बुन्दी ग्रीन्फील्ड् विमानस्थानकस्य शिलान्यासं कृतवन्तः। शिलान्यास-समारोहस्य अवसरे आभासीय-मध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् वायु-सम्पर्केण सम्बद्धानि क्षेत्राणि द्रुततरं विस्तृतं विकसितं च अनुभवन्ति इति। अद्य नूतनस्य कोटा-बुण्डी-ग्रीन्फील्ड्-विमानस्थानकस्य शिलान्यास-समारोहस्य अवसरे आभासीय-मध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्री उक्तवान् यत् चतुर्दशोत्तर द्विसहस्र तमवर्षात् प्राक् भारते प्रायः सप्तति विमानस्थानकानि एव आसन्, परञ्च अधुना विमानस्थानकानां सङ्ख्या षष्ठ्योत्तरैकशततः अधिका जाता। सः अवोचत् यत् इदानीं देहली-नगरं परितः अनेकानि विमानस्थानकानि विकसितानि सन्ति। श्रीमोदी अवदत् यत् यदा विमानस्थानकानि निर्मीयन्ते तदा ते समीपस्थेषु लघुनगरेषु उद्यमशीलताम् पर्यटनं च प्रोत्साहयन्ति, तथा च अस्मिन् प्रदेशे आर्थिकक्रियाकलापान् च त्वरितं कुर्वन्ति। सः अवदत् यत् कोटा-विमानस्थानकं कोटा-नगरं परितः स्थितानां क्षेत्राणां कृते प्रगतेः नूतनं द्वारं उद्घाटयिष्यति।

लोकसभायाः अध्यक्षः ओम बिरला वर्यः अपि कार्यक्रमम् अभिसंबोधितवान्।

---------------------------------------------------------

## राष्ट्रपति-संथाल-सम्मेलनम्-राष्ट्रपतिः

राष्ट्रपतिः द्रौपदीमुर्मुः अवदत् यत् केन्द्र-सर्वकारेण जनजातीय-समुदायानां, तेषां सांस्कृतिकपरम्पराणां, भाषाणां च सर्वांगीणविकासाय अनेकानि उपायानि स्वीकृतानि इति। अद्य राष्ट्रपतिः पश्चिमबङ्गस्य दार्जिलिङ्ग्-नगरे अन्ताराष्ट्रिय-संथाल-परिषदा आयोजिते नवमम् अन्ताराष्ट्रिय-संथाल-सम्मेलनं अभिसंबोधितवती। अस्मिन् अवसरे सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, समृद्धा संथाली-संस्कृतिः परम्पराः च प्रकृत्या, पर्यावरण-संरक्षणेन, मानवेन सह तस्य सह-अस्तित्वेन च गभीरतया सम्बद्धानि सन्ति। सा अवोचत् यत् संथाल-समुदायस्य ओल्-चिकी-लिपि संविधानस्य अष्टम-अनुसूच्यां समाविष्टा आसीत् इति। सा अवोचत् यत्

त्रयोविंशत्यधिक द्विसहस्रतम वर्षादारभ्य विभिन्नेषु राज्येषु बहवः आदिवासि-सङ्ग्रहालयाः स्थापिताः सन्ति यानि आदिवासिनां संस्कृतिं, परम्पराः, इतिहासं च वैभवी कुर्वन्ति।

---------------------------------------------------------

## राष्ट्रपति-महिला-दिवसः-

अन्ताराष्ट्रिय-महिला-दिवसस्य पूर्वसन्ध्यायां राष्ट्रपतिः द्रौपदी-मुर्मुः वर्या देशस्य सर्वेभ्यः नागरिकेभ्यः, विशेषतः महिलानां कृते शुभाशयाः च प्रेषितवती। स्वस्य सन्देशे राष्ट्रपतिः अवदत् यत् महिलाः समाजस्य राष्ट्रस्य च आधारस्तम्भाः सन्ति तथा च शिक्षिताः, स्वावलम्बिनः, सशक्ताः च महिलाः समृद्धस्य प्रगतिशीलस्य च राष्ट्रस्य कृते दृढतया योगदानं कर्तुं शक्नुवन्ति। अद्य युवत्यः नूतन-भारतस्य स्वप्नानि निर्मीयन्ते इति राष्ट्रपतिः अवधानं दत्तवती।

---------------------------------------------------------

## प्रधानमन्त्री-दिल्ली

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्यां प्रायः सार्द्ध-त्रयःत्रिंशतसहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च करिष्यति। श्री मोदी प्रायः त्रिशताधिक अष्टादश-सहस्र-कोटिरूप्यकाणां दिल्ली-मेट्रो-परियोजनानां उद्घाटनम्, शिलान्यासं च विधाष्यति। सः देहली-मेट्रो इत्यस्य द्वयोः नूतनयोः मार्गयोः उद्घाटनं करिष्यति। प्रधानमन्त्री श्रीमोदी दिल्ली-मेट्रो इत्यस्य फेज-फाईव-ए इत्यस्य अन्तर्गतस्य षोडश किलोमीटर्- परिमितस्य मार्गस्य त्रयाणां नूतनानां मार्गाणां शिलान्यासम् अपि करिष्यति। सामान्य-पूल्-आवासीय-आवासस्य (जी. पी. आर्. ए.) पुनर्विकास-योजनायाः अन्तर्गतस्य द्विशताधिक-पञ्चदश-सहस्र कोटि-रूप्यकाणां बहुविध-परियोजनानां उद्घाटनम् शिलान्यासं चापि सः करिष्यति।

---------------------------------------------------------

## उत्तरखण्ड-अमितशाहः

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य उत्तराखण्ड-राज्यस्य हरिद्वार-नगरे प्रायः त्रिंशोत्तरैकशतकोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनम् तथा शिलान्यासं

कृतवान्। अस्मिन् अवसरे जन-जन की सरकार, चार साल बेमिसाल इत्यनेन शीर्षकेन कार्यक्रमः आयोजितः आसीत्। उत्तराखण्ड-सर्वकारस्य चतुर्वर्षाणां स्मरणे अस्मिन् कार्यक्रमे राज्य-स्तरीय-प्रदर्शिन्यः स्थापिताः आसन्, यत्र सर्वकारस्य प्रमुख-उपलब्धयः, प्रमुख-नीति-निर्णयाः च प्रदर्श्यन्ते।

---

## तैल मूल्यानि

तैल-विपणन-संस्थाः देशस्य महानगरेषु विना-अनुदानितस्य गृह एल्. पी. जी.- वातीन्धनेत्यस्य मूल्यं षष्ठी रूप्यकाणि, वाणिज्यिक-सिलिण्डर इत्यस्य मूल्यं पञ्चदशोत्तरैकशत रूप्यकाणि यावत् च वर्धितवन्तः।

---

## जयशङ्कर-रायसीना

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य अवदत् यत् देशस्य उन्नतिः भारतेन तस्य शक्त्या च निर्धारिता भविष्यति, न तु अन्येषां दोषैः। सः षड्विंशत्यधिक द्विसहस्रतम वर्षस्य रायसीना डायलाग इत्यत्र, स्वस्य सेशेल्स्, मारिशस् श्रीलङ्कादेशानां समकक्षैः तथा आस्ट्रेलिया-देशस्य पूर्वविदेशमन्त्रिणा सह 'समुद्रस्य हृदयः' इत्यस्मिन् विषये भाषणं कुर्वन् एतानि वक्तव्यानि प्रदत्तवान्। सः अवदत् यत् देशस्य उन्नतेः मार्गः अतीव स्पष्टः अविच्छिन्नः च अस्ति।

---

## चतुरङ्ग-विश्व-विजेता

चतुरङ्ग-विश्व-विजेता डी. गुकेशः ह्यः चेक्-रिपब्लिक्-देशे प्राग्-अन्ताराष्ट्रिय-चेस्-फ़ेस्टिवल् इत्यस्मिन् मास्टर्स-श्रेण्याः नवमे तथा अन्तिमक्रमे स्पेन्-देशस्य डेविड् आन्टन् गुय्जारो इत्यमुं पराजयत।

।। इति वार्ता: ।।